N.A.
Ananta
अनंत
sanskrit
Paper - Printed
1941 sambat (134 years old)
16 folio
7.5" x 4"
Complete

नं. ४०८

॥अथग्रन्तंतप्रारम्भः॥छ॥६॥

अ. श्रीगणेशायनमः ॥ अथानन्तपूजा ॥ मण्डलंसर्वतोभद्रं कृत्वाकु
१ म्भान्तुविन्यसेत् तत्रचाष्टदलेपद्मेपूजयेद्विष्णुमव्ययम् कृत्वादर्भम
यंदेवंफणासप्तकमण्डितं तस्याग्रतोदृढंसूत्रंकुङ्कुमाक्तंसुशोभनं ॥
चतुर्दशग्रन्थिसंयुक्तमुपस्थाप्यप्रपूजयेत् ततस्तुमूलमन्त्रेणनमस्कृत्य
चतुर्भुजंनवाम्रपल्लवाभासंपिङ्गभ्रूश्मश्रुलोचनंपीताम्बरधरंदेवंशं
खचक्रगदाधरम् प्रसन्नवदनंविष्णुंविश्वरूपंविचिन्तये इतिध्यानं। राम
।आगच्छानन्तदेवेशतेजोराशेजगत्पते क्रियमाणांमयापूजांगृहा १

णासुरसत्तम् सहस्रशीर्षेत्यावाहनं ततो गंधर्षिदेवताः विष्णुरग्निस्तथा
दित्यः सहस्राक्षः पितामहः इन्द्रः पिनाकी विघ्नेशः स्कन्दः सोमस्तथैव च
वरुणः पवनः पृथ्वी वसवो गंधर्षिदेवताः नानारत्नसमायुक्तं कार्तस्वर
विभूषितं आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यतां पुरुष एवेदमित्यास
नं गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतं तोयमेतत्सुखस्पर्शं पाद्या
र्थं प्रतिगृह्यतां एतावानस्येति पाद्यं अनन्तानन्त देवेश अनन्तफलदाय
क अनन्तारूपो सि गृहाणार्घ्यं नमोस्तु ते त्रिपादूर्ध्वमित्यर्घम् कर्पू

अ॰ रवासितंतोयंमन्दाकिन्याः समाहृतं आचम्यतांजगन्नाथमयाहृतंहि
२ भक्तितः ततोविरुडित्याचमनम् पंचामृतेनस्नपनंकरिष्येसर्वसिद्धि
दंकार्य्यमेसिद्धिमानुपूजितेत्वयिधातरि पयोदधिघृतंगव्यंमाक्षिकंश
र्करातथा पञ्चामृतेनस्नपनगृहाणजगःपते पंचामृतस्नानं॰ गङ्गाच
यमुनाचैवनर्मदाचसरस्वती तापीपयोष्णीरेवाचताभ्यःस्नानार्थमाहृतं
तोयमेतत्सुरवस्पर्शंस्नानीयंप्रतिगृह्यतां पत्नुरुषेरोतिस्नानम् पीतां ए॰
म्बरयुगंदेवसर्वकामार्थसिद्धये मयानिवेदितंभक्त्यागृहासुरसत्तमतं २

यत्तमिवस्त्रम् दामोदरनमस्तेस्तुत्राह्मिमांभवसागरात् ब्रह्मसूत्रंसोत्तरीयं
गृहाणपुरुषोत्तम तस्माद्यज्ञादितियज्ञोपवीतम् कस्तूरीकुंकुमोपे
तंकर्पूरेणचसंयुतं गन्धंदास्यामिदेवेश अनन्तायनमोनमः इतित
स्माद्यज्ञात्सर्वहुतऋचइतिगंधम्॥ अक्षताश्चसुरश्रेष्ठकुंकुमाक्ताःसु
शोभनाः वासुदेवजगन्नाथप्रीत्यामेस्वीकुरुप्रभो॥ इतिअक्षताः॥ माल्या
दीनिसुगंधीनिमालत्यादीनिवैप्रभोमयाहृतानिपुष्पाणिपूजार्थंस्वीकु
रुप्रभो तस्मादश्वाइतिपुष्पं॰ अथाङ्गपूजा॰ अनन्तायनमः पादौ

अ॰ पू॰ सङ्कर्षणायनमः गुल्फौपू॰ कालात्मनेनमः जानुनीपू॰ विश्वरू
३ पायनमः जङ्घे नेत्रायनमः कटिंपू॰ मधुसूदनायनमः मेढ्रंपू॰ पद्मना
भायनमः नाभिंपू॰ परमात्मनेनमः हृदयंपू॰ श्रीकण्ठायनमः कण्ठं
पू॰ सर्वास्त्रधारिणेनमः बाहूपू॰ हरयेनमः मुखंपू॰ वाचस्पतयेन॰
मः जिह्वांपू॰ दामोदरायनमः दन्तान्पू॰ केशवायनमः ललाटंपू॰ कम
लासनायनमः शिरःपू॰ सर्वात्मनेनमः सर्वाङ्गं पूजयामि ॥ वनस्पति ग॰
रसोद्भवो गन्धाढ्यो गन्धउत्तमः आघ्रेयः सर्वदेवानां धूपोयंप्रतिगृह्य ३

नाम् यन्मुरुष मिति धूपं आज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया दीपंगृ
हाण देवेश त्रैलोक्यतिमिरापहं ब्राह्मणोसेतिदीपं। अन्नंचतुर्विधंस्वा
दुरसैःषड्भिःसमन्वितम् नानाभक्ष्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां नैवेद्यं
गृह्यतांदेवभक्तिंमेह्यचलांकुरु ईप्सितंमेवरंदेहिपरत्रचपरागतिं चंद्र
मामनसइतिनैवेद्यम्॥ इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसफ
लावाप्तिर्भवेज्जन्मनिजन्मनि नाभ्याआसीदितिफलम् पूगीफलम् महा
द्दिव्यंनागवल्लीदलैर्युतं कर्पूरादिसमायुक्तंताम्बूलंप्रतिगृह्यतां सप्तास्या

अ समिश्रितंतांवूलं हिरण्यगर्भगर्भस्थंहेमवीजंविभावसोः अनन्तपुण्यफल
४ दमतः शांतिंप्रयच्छमेयत्नेनयज्ञमितिर्दक्षिणा पञ्चवर्तिसमायुक्तंसर्व
मङ्गलदायकम् नीराजनंनिरीक्षस्व अनन्तायनमोनमः इतिनीराजनं ॥
मालतीमल्लिकापुष्पैः नागचम्पकसंयुतैः पुष्पांजलिंगृहाणेमंपादाबु
जयुगार्पितंविष्णुमन्त्रैः पुष्पांजलिः अनन्तकामान्मेदेहिसर्वकामफल
प्रद अनन्तयनमस्तुभ्यंपुत्रपौत्रंप्रवर्धय अनन्तः सर्वकामानामधिपः रा
सर्वकामानामधिनेनस्तुप्रीतोभवत्विहसदामम नमस्तेदेवदेवेशनमस्ते ४

धरणीधर नमस्ते कमलाकान्त नमस्ते ब्रह्मरप्रिय नमस्ते सर्वभूतेश वा
सुदेव नमोस्तु ते इति प्रार्थना० अनन्ताय नमस्तुभ्यं सहस्रशीर्ष नमो नमः
नमोस्तु पद्मनाभाय नागाधिपतये नमः संसारगह्वरगुहासु सुखं वि ॥
हर्तुं वाञ्छन्ति ये कुरुकुलोद्भव शुभसत्वाः संपूज्य च त्रिभुवनेशमनंतदेवं
बध्नंति दक्षिणकरे वरदोरकं ते अनन्तसंसारमहासमुद्रे मग्नं समभ्यु
द्धर वासुदेव अनन्तरूपेण नियोजयस्व अनन्तसूत्राय नमो नमस्ते दोर
कबन्धनमंत्रः जीर्णदोरकं पूर्ववत् संपूज्य विसर्जयेत्० न्यूनातिरि

अ० कृतानि परिस्फुटानि यानीह कर्माणि मया कृतानि क्षम्याणि चैतानि मम क्षमस्व
पृ० मया हि तुष्टः पुनरागमाय ॥ इति पूजा ॥ दाता च विष्णुर्भगवाननंतः प्रति
ग्रहीता च स एव विष्णुः तस्मात् त्वया सर्वमिदं ततं च प्रसीद देवेश वरा
न्ददस्व प्रतिग्रह द्विजश्रेष्ठ अनन्तफलदायक त्वत्प्रसादाद्धि विप्रन्द्र
मुच्येहं कर्मबन्धनात् पक्वान्नं फलसंयुक्तं सघृतं दक्षिणान्वितं द्वि
जवर्यप्रदास्यामि व्रतसंपूर्तिहेतवे मन्त्रः अनन्तः प्रतिगृह्णाति अ ए
नन्तो वै ददाति च अनन्तस्तारको भाभ्यामनन्ताय नमो नमः ॥ इति पृ०

वायनदानम् ॥ अथ कथाप्रारम्भः ॥ सूत उवाच ॥ अरण्ये वर्तमाना
स्ते पांडवा दुःखकर्षिताः ॥ कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य यथाक्रमं
॥ १ युधिष्ठिर उवाच ॥ अहं दुःखी हि संजातो भ्रातृभिः परिवारितः ॥ कथं
मुक्तिर्वदास्माकं मनन्तात् दुःखसागरात् २ कं देवं पूजयित्वा वै प्रा
प्स्यामो राज्यमुत्तमम् ॥ अथवा किंव्रतं कृत्वा त्वत्प्रसादाद्भवी हि नः ॥
॥ ३ श्रीकृष्ण उवाच ॥ अनन्तव्रतमस्त्यन्यत् जिष्णावस्यामनुत्तमं ॥ सर्व
पापहरं नृणां स्त्रीणां चैव युधिष्ठिर ४ शुक्लपक्षे चतुर्दश्यां मासि

अ· भाद्रपदेभवेत्॥तस्यानुष्ठानमात्रेणसर्वपापंव्यपोहति ५ युधिष्ठिरउवा
६ च॥कृष्णकोयमनंतेतिप्रोच्यतेयस्त्वयाविभो किंशेषनागआहोस्विद्
नंतस्तत्तक्षकःस्मृतः ६ परमात्माथवानंतउताहोब्रह्मगीयते॥कए
षोनंतसंज्ञोवैतथ्यंमेब्रूहिकेशव ७ श्रीकृष्णउवाच॥अनंतइत्यहंपा
पार्थममरूपंनिबोधतत्॥आदित्यादिग्रहात्मायोयःकालउपपद्यते।
॥ ८ कलाकाष्ठामुहूर्तादिदिनरात्रिशरीरवान्॥पक्षमासर्तुवर्षाणियुग राम·
कालव्यवस्थया ९ योयंकालोमयाख्यातःसोनंतइतिकीर्त्यते। ६

सोहंकालोवतीर्णोत्रभूभारोत्तारणायच १० दानवानांवधार्थायवसु
देवकुलोद्भवः॥अनन्तंविद्धिमांपार्थसाधूनांपालनायच ११ अ
नादिमध्यपर्यंतकृष्णंविष्णुंहरिंशिवं। वैकुण्ठंभास्करशेषसर्वव्यापि
नमीश्वरं १२ विश्वरूपंमहाकालंसृष्टिसंहारकारकं॥प्रत्ययार्थंमयारू
पंफाल्गुनायप्रदर्शितः १३ पूर्वमेवमहाबाहोयोगिध्येयमनुत्तमं॥वि
श्वरूपमनन्तंचयस्मिन्निंद्राश्चतुर्दश १४ वसवोष्टौद्वादशादि
त्यारुद्राएकादशामताः॥सप्तर्षयःसमुद्राश्चपर्वताःसरितोद्रुमाः॥

अ० ॥१५ नक्षत्राणि दिशो भूमिः पातालं भूर्भुवादिकं ॥ माकुरुष्वात्र सन्दे
७ हं सोहं पार्थ न संशयः १६ युधिष्ठिर उवाच ॥ अनन्तव्रतमाहात्म्यं विधिं
वद विदांवरं ॥ किं पुण्यं किं फलम् चास्य अनुष्ठानवतां नृणां ॥ १७
केन चादौ पुराचीर्णं मर्त्ये केन प्रकाशितं ॥ एवं सविस्तरं कृष्ण त्वं ब्रूह्यन
न्तव्रतं मम १८ श्री कृष्ण उवाच ॥ आसीत् पुरा कृतयुगे सुमन्तो नाम
वै द्विजः ॥ वसिष्ठ गोत्रे चोत्पन्नः सुरूपां स भृगोः सुतां १९ दीक्षानां
म्नीं चोपयेमे वेदोक्त विधिना नृप ॥ तस्याः कालेन संजाता दुहितान

नलक्षणा २० शीलानामसुशीलास्यावर्द्धतेपितुर्वेश्मनि॥ माताचत
स्याःकालेनज्वरदाहेनपीडिता २१ विननाशनदीतीरेत्ययौस्वर्गपति
व्रता।स्त्रमत्तस्तुनतोन्यांवैधर्मपुंसःसतांपुनः २२ उपयेमेविधानेन
दुःशीलांनामनामतः। दुःशीलांकर्कशांचरंडीनित्यंकलहकारिणीं
।२३ सापिशीलापितुर्गेहेगृहार्चनपराभवौ॥कुड्यस्तंभतुलाधारदे
हलीतोरणादिषु २४ वर्णकैश्चित्रमकरोन्नीलपीतसितासितैः। स्व
स्तिकैःशङ्खचक्रैश्चअर्चयंतीपुनःपुनः २५ ततःकालेबहुतिथेकोमा

अ· स्ववशवर्त्तिनी।पित्रादृष्टान्तरातेनस्त्रिचिह्ना।यौवनेस्थिता २६ कस्मै
८ देयामयाशीलाविचार्येतिसुदुःखितः॥ एतस्मिन्नेवकालेतुमुनिर्वे
दविदांवरः २७ कन्यार्थीचागतःश्रीमान्कौन्योमुनिसत्तमः॥ उवाच
रूपसम्पन्नांत्वदीयांतनयांहृणो २८ पिताददौद्विजेन्द्रायकौडिन्यो
यंशुभेदिने॥ गृह्योक्तविधिनापार्थविवाहमकरोत्तदा २९ निर्वर्त्योद्
हिकंसर्वंप्रोक्तवान् कर्कशांद्विजः। किंविद्यादिकंदेयंजामातुःप ए·
रितोषकं ३० तच्छ्रुत्वाकर्कशाक्रुद्धाप्रोत्सार्यगृहमण्डनं॥ पेटायांसु ८

स्थिरं ध्यापि नृवेश्मनि सापयौ ३१ भोज्यावशिष्टचूर्णेन दापाथेयञ्च

चकार सा। कौडिन्योपिविवाहेन पथि गच्छन्शनैःशनैः ३२ शी

लां सुमनां दारायन वोढां गोरथेनहि। मध्याह्ने भोज्यवेलायां समुत्ती

र्यसरित्तटे ३३ ददर्शशीलासास्त्रीणां समूहं रक्तवाससां। चतुर्दश्या

मर्चयन्तं भक्त्यादेवं जनार्दनं ३४ उपगम्यशनैः शीलापप्रच्छस्त्रीक

दंवकं। आर्याः किमेतन्मेब्रूत किन्नामव्रतमीदृशं ३५ ताऊचुर्यो

षितस्ताश्च शीलां शीलविभूषणां॥ अनन्तव्रतमेतद्धि व्रतेनेनन्तःप्रपू

अ० ज्यते ३६ साब्रवीद्धृष्टमेष्येतत्करिष्येव्रतमुत्तमम् । विधानंकीदृशंत
९ त्रकिंदानंकोत्रपूज्यते ३७ स्त्रियऊचुः शीलेसदन्नप्रस्थस्यपुन्नाम्ना
संस्कृतस्यच ॥ अर्धंविप्रायदातव्यमर्धमात्मनिभोजनम् ३८ शक्त्या
चदक्षिणांदद्याद्वित्तशाठ्यविवर्जितः ॥ कर्तव्यंसत्सरित्तीरेविधि
नानेनमानिनि ३९ स्नात्वानन्तंसमभ्यर्च्यमण्डलेधूपदीपकैः ॥ पुष्पै
र्गन्धैश्चनैवेद्यैः पीतरक्तैश्चतुःसमैः । ४० ॥ तस्याग्रतोदृढंसूत्रंकुङ्कु । रा०
माक्तंसुडोरकं । चतुर्दशग्रंथिसंयुक्तंवामेकंरतलेन्यसेत् ४१ अनन्ता । ९

संसारमहासमुद्रेमग्नंसमभ्युद्धरवासुदेव ॥ अनन्तरूपोविनियजयस्व
अनन्तसूत्रायनमोनमस्ते ४२ अनेनदोरकंध्वाभोक्तव्यंस्वस्थमान
से ॥ ध्यात्वानारायणंदेवमनंतंविश्वरूपिणम् ४३ भुक्त्वाचान्तेव्रजेद्गे
हमभद्रेप्रोक्तंव्रतंतव ॥ श्रीकृष्णउवाच ॥ एवमाराजेन्द्रप्रहृष्टेनानराम
ना ॥ सापिचक्रेव्रतंशीलाकरेवध्वासुगृहं ४५ भर्त्रासत्रासहेवशनकैः
प्रत्ययस्तनस्त्वरणाद्भूत् । तेनानन्तव्रतेनास्यावभौगोधनसङ्कुलम् ।
।४६ गृहस्त्राममश्रियाजुष्टंधनधान्यासमन्वितं ॥ अकुलंव्याकुलंरम्यं

अ· सर्वत्रातिथिपूजनैः ४७ सापिमाणिक्यकांचीभिर्मुक्ताहारविभूषिता॥
१० दिव्याङ्गवस्त्रसंछन्नासाविश्रीप्रतिमाभवत् ४८ कदाचिदुपविष्टा
याहर्म्येवद्धःसुंदरकः॥ शीलायाहस्तमूलेतुभर्त्तानेनहिजन्मना४९
श्रीमदांधेनकैरव्यसासेपत्रोदितोरुषा॥ कोनन्तरइतिमूढेनजल्प
तापापकारिणा ५० क्षिप्तोज्वालाकुलेवन्हौहाहाकृत्वाप्रधावती॥ शी
लायहीत्वातनसूत्रंक्षीरमध्येसमाक्षिपत् ५१ तेनकर्मविपाकेनसाश्रीस्त शा·
स्याःक्षयंगता॥ गोधनंतस्करैर्नीतंगृहंदग्धंधनंगतं ५२ यद्यच्छैवागा १०

नंगेहेनन्नथैवपुनर्गतं ॥स्वजनैः कलहोनित्यंबन्धुभिस्तुजनंतथा॥
५३ अनन्ताक्षेपरोषेणाद्दारिद्यंप्रतिजगृहे॥नकश्चिद्दृश्यतेलोकेतेन
सांईयुधिष्ठिर् ५४ शरीरेणातिसंतप्तोमनसात्यतिदुःखितः॥निर्वे
दंपरमंप्राप्तःकौण्डिन्यःप्राहतांप्रियां ५५ कौंडिन्यउवाच॰॥शीलेम
मेदमापन्नंसहसाशोककारकम्॥येनातिदुःखितोस्माकमज्ञानःस
र्वधनक्षयः ५६ स्वजनैःकलहोगेहेनकश्चिन्मांप्रपद्यते॥शरीरेनित्य
सन्तापःखेदश्चेतसिदारुणः ५७ जानासिदुर्नयःकोत्रकिंकृतेनसु

अ· कृतमभवेत्॥शीलोवाच॰ प्रत्युवाचपतिंशीलासुसुशीलालमण्डना॥।
११ प्रायोनन्तकृताशेषपापसम्भवजंफलम् ५८ भविष्यतिमहाभागतद्
र्थंयत्नमाचर॥एवमुक्तःसविप्रर्षिर्जगाममनसाहरिम् ५९ निर्वेदान्नि
र्जगामाथकौडिन्यःप्रययौवनं॥तपसेकृतसंकल्पोवायुभक्षोद्विजो
त्तमः ६० मनस्याधायचानंतंक्वद्रक्ष्यामिचतंविभुं॥यस्यप्रसादात्सं
जातमाक्षेपान्निधनंगतम् ६१ धनादिकंममानीवसुखदुःखप्रदायकं ए·
।एवंसंचिंतयन्सोथवभ्रामविजनेवने ६२ तत्रापश्यन्महाचूतेषु ११

ष्यितेपलितंतथा॥वर्जितंस्थास्थिसङ्घातैः कीटकोटिव्रतंतथा ६३ नमग्रा-
च्छलयंनन्तक्कचिद्दृष्टोमहान्तरे॥ब्रूहिसौम्यममानीवदुःखंचेत्तसिवर्तते
६४ सोऽब्रवीद्ब्रह्मनानन्तंक्कचित्पश्यामिचद्विज॥एवंनिराकृतस्तेनसगा-
माप्यदुःखितः ६५ क्कद्रक्ष्यामीतिगच्छन्सग्राममपश्यत्सवत्सकां॥तृण
मध्येप्रधावन्तींमित्रेश्वेनश्वपाराइव॥६६ अब्रवीद्धेनुकेब्रूहिययनंत
स्त्वयेक्षितः।साचोवाचायकोपिद्दन्यनानंतंवेद्म्यहंद्विज ६७ ततो
व्रजन्ददर्शाग्रेगोवृषंशाड्वलेस्थितं॥दृष्ट्वापप्रच्छगोस्वामिन्ननन्तो

अ॰ वीक्षितस्त्वया ६८ गोवृषस्तमुवाचेदं नानन्तो वीक्षितो मया। ततो व्रज
१२ न् ददर्शाग्रे रम्यां पुष्करिणीं हृदं ६९ अन्योन्यजलकल्लोलैर्वीचिपर्यन्त
संगमे॥ स्फुल्लं किंजल्ककल्हारकमलोत्पलमण्डिते ७० सेवितं भ्रम
रैर्हंसैश्चक्रैः कारण्डवैर्बकैः तेचापि स्फु द्विजोनंतो भवद्भ्यां नोपलक्षि।
तः ७१ ऊचतुस्तौ द्विजश्रेष्ठ नानन्तो वीक्षितो द्विज। ददर्शाथ वने तस्मिन्
गर्दभं कुंजरं तथा ७२ तावप्युक्तौ द्विजेनेत्थं नेति ताभ्यां निवेदितम्॥ ए रा॰
वं संपृच्छमानस्ताश्च ततैव निषसाद ह ७३ कौंडिन्यो विह्वलीभूतो १२

निराशोजीवितेनृप ॥ दीर्घमुष्णंचनिःश्वस्यपपातभुविभारत ७४ प्रा
प्यसंज्ञामनन्तेतिजल्पन्नुत्थायसद्विजः ॥ नूनंत्यक्ष्याम्यहंप्राणानितिनि
संकल्प्यचेतसि ७५ उत्थाप्योद्बध्यवृक्षेस्मिंल्लतावद्भरतसत्तम ॥ कृपया
नन्तदेवोपिप्रत्यक्षःसमजायत ७६ वृद्धब्राह्मणरूपेणइमराहीत्युवा
चतम् । प्रगृह्यदक्षिणेपाणौगुहायांप्राविशच्चतां ७७ सांपुरींदर्शया
मासदिव्यनारीनरैर्युतां । तस्यांनिविष्टमात्मानंदिव्यसिंहासनेशुभे ७८
पार्श्वस्थशङ्खचक्राब्जगदागरुडशोभितं । दर्शयामासविप्रायस्वीयं

अ॰ रूपमनन्तकम् ७९ विभूतिभेदैर्ध्यानैस्तैरनंतममितौजसं । तेदृष्ट्वानाह
१३ शंरूपमनन्तमपराजितं ८० वेद्यमानो जगादैवं जयशब्दपुरःसरं ॥ क्ष
हं पापकर्माहं पापात्मा पापसम्भव ८१ त्राहि मां पुण्डरीकाक्ष सर्वपा
पहरो भव । तच्छ्रुत्वानेन देवेशः प्राह स्निग्धया गिरा ८२ मा भैस्त्वं कृ
हि विप्रेंद्र यत्तेमनसि वर्त्तते ॥ कौण्डिन्य उवाच ॥ मया भूत्वा न लिप्सेनचौ
रितो नन्त हे रक्षः ८३ तत्र पापविपाकेन मूर्तिर्मे प्रलयं गता । स्वजनैः कृ
लहो गेहे न कश्चिन्मां प्रभाषते ८४ निर्वेदाद्धि मनो रण्यपानवद्दर्शनकां १३

स्पथा। कृपया देव देवेश त्वयात्मसंप्रदर्शितः ८५ तस्य पापस्य मे शां-
तिं कारुण्याद्दातुमर्हसि ॥ श्रीकृष्ण उवाच ॥ तच्छ्रुत्वानन्तदेवस्तमु-
वाच द्विजसत्तमम् ८६ भक्त्या सन्तोषितो देवः विनष्टघातु युधिष्ठिर।
अनन्त उवाच ॥ स्वगृहं गच्छ कौण्डिन्य मा विलम्बं करिष्यसि ८७ च
रानन्तव्रतं भक्त्या नववर्षाणि पञ्च च ॥ सर्वपापविशुद्धात्मा प्राप्स्यसे
सिद्धिमुत्तमम् ८८ पुत्रपौत्रं समुत्पाद्य भुक्त्व भोगान्यथेप्सितान अन्ते
च स्मरणं प्राप्य मामुपेष्यस्यसंशयम् ८९ अन्यं च ते वरं दास्यामि सव।

अ· लोकोपकारकं इदमाख्यानकवरं शीलानन्तव्रतादिकं ९० करि-
१४ ष्यति नरो यस्तु कुर्वन्व्रतमिदं शुभम् ॥ सो चिरान्मायनिर्मुक्तः प्राप्नो
ति परमां गतिं ९१ गच्छ विप्र गृहं शीघ्रं यथायेनागतो ह्यसि ॥ कौंडि
न्य उवाच० ॥ स्वामिन्पृच्छामि मे ब्रूहि किंचित्कौतूहलं मया ॥ अरण्ये
भ्रमता दृष्टं नानाद्विजगद्गुरो ९२ स चूतवृक्षः कस्तत्र का गौः को वृ
षभस्तथा । कमलोत्पलकल्हारैः शोभितं सुमनोहरं ९३ मया दृष्टं ए·
महारण्ये किं तत्पुष्करिणीद्वयं । कः खरः कुंजरः कोसौ कोसौ वृद्धो १४

द्विजोत्तमः ९४ श्रीअनन्तउवाच॥ स्वचूतस्त्वो विप्रोसौ विद्यावेद
विशारदः॥सोर्थिनोपि न च प्रादान्भिक्षुभ्यस्तरुनोगतः ९५ सागो
र्वसुन्धरा दृष्टा सफला यात्वया द्विज वृषो धर्मस्त्वया दृष्टः शालं सत्य
मास्थितः ९६ धर्माधर्मव्यवस्थानन्त्वपुष्करिणी द्वयम्॥ब्राह्मण्यै
केचिदप्यास्ता भगिन्यौ तेपरस्परं ९७ धर्माधर्मादिपङ्क्तिश्चिन्तनं
वेदयन्तो मिथः विप्रायनक्कचित् दत्तमतिथौ दुर्बलेपिवा ९८ भि
सादत्तान चार्थिभ्यस्तेन पापेन कर्मणा वीचिकल्लोलमालाभिर्गच्छ

अ· नस्तपरस्परं ९९ स्वरः क्रोधस्त्वपादष्टः कुब्जरोमदउच्यतेब्राह्म
१५ णोसावनेतोहं गुह्यासंसारगह्वरम् १०० इत्युक्त्वाहेवहेवेशस्तत्रैवांत
रधीयत ॥ स्वप्रायंस्ततद्दृष्ट्वातनः स्वगृहमागतः १०१ कृत्वानन्तव्रतं
सम्यग्नववर्षाणिपञ्चच ॥ मुक्त्वासर्वमनंतेनयथोक्तंपाराड्डनन्दन
१०२ अनेचस्मरणंप्राप्यगतानन्तपरंद्विजः ॥ तथात्वमपिएजर्षेक
थांश्रुत्वानन्तव्रतं कुरु १०३ प्राप्स्यसेचिन्तितंसर्वमनन्तस्यवचोय ग·
था ॥ यहच्चतुर्दशोवर्षेफलंप्राप्तंद्विजन्मना १०४ वर्षैकेनतदा १५

प्रोतिकृत्वोपारव्यानकंव्रतं। एतत्तेकथितंभूपव्रतानामुत्तमंव्रतम्
१०५ यत्कृत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः॥ येपिशृण्वन्तिसत
तंपठ्यमानंपठंतिये १०६ तेपिपापविनिर्मुक्ताः प्राप्स्यन्तिचहरेःपुर
म् संसारगह्वरगुहासुसुखंविहर्तुंवाञ्छंतियेकुरुकुलोद्भवशुद्धसत्वाः
संपूज्यचत्रिभुवनेशमनंतदेववध्नंतिदक्षिणकरेवरडोरकंते १०७॥॥
इतिश्रीभविष्योत्तरपुराणेसूतशौनकसम्वादे अनन्तव्रतकथासमा
प्ता॥संम्वत् १९४१ भाद्रशुक्ल ८ वारगुरूवासरे॥ शुभमस्तु

अ॰न॰
१६

॥श्रीकाशीविश्वनाथपुरीमेमहल्लाछोरकीपीअरीपरयहबाबूकवलेसर
सिंघकेमकानमेबाबूकीसहनदयालसिंघकेछापाखानेमेगनेसप्रभाकर
छापाखानेमेअनंतकथाछापागयाजिसकोलेनाहोयसोनईसड़कपर
बाबूकवलेसरसिंघकेदुकानपरमिलैगा लौ॰ द्वारकातीवारी छापालगो
पाल सम्वत् १९४१ भाद्र सुक्ल ८ ॥

राम॰
१६